# संस्कृत-वार्ता:

दिनाङ्क :- 15.02.2026 प्रात: - 06:55

**प्रधानमन्त्री-असम-भ्रमणम्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः असम-राज्ये प्रायः सार्द्ध-पञ्च-सहस्र-कोटिरूप्यकाणां अनेकासां विकासपरियोजनानां उद्घाटनम्, ध्वज-प्रदर्शनं च कृतम्। प्रधानमंत्री अवदत् यत् गत एकादशवर्षेषु पञ्च-दशमलवोत्तर-पञ्च लक्षं कोटिरूप्यकाणि पूर्वोत्तरस्य कृते आबन्टितानि तथा क्षेत्रस्य आधारभूत-संरचना-क्षेत्रेषु अभूतपूर्वः विकासः दृश्यते।

---------------------------------------

**पी. एम.कैबिनेट-नवदिल्ली**

दिल्ली, हरियाणा, महाराष्ट्र, कर्नाटक-राज्येषु विभिन्नेषु मण्डलेषु व्याप्तानां तिसृणां बहुविध-परियोजनानां कृते मन्त्रिमण्डलेन अनुमोदनं प्राप्य रेल-विभागस्य आधारभूत-संरचना: सुदृढं भविष्यति, परिवहन-व्ययं न्यूनीभविष्यति तथा च यूनां कृते वृत्यावसराणां सृजनं भविष्यति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। हैदराबाद्-पनाजी-आर्थिक-मार्गस्य गुडेबेल्लूर्-तः महबूबनगरपर्यन्तं राष्ट्रिय-राजमार्गस्य सप्तषष्ठ्यधिकैकशत तमस्य विस्तारस्य निर्णयः आर्थिकवृद्धिं वर्धयिष्यति, वृत्यावसरस्य सृजनं करिष्यति, जीवनस्य सुगमतां च वर्धयिष्यति इति श्रीमोदिना उक्तम्। प्रधानमन्त्री श्रीमोदी अवदत् यत्, मन्त्रिमण्डलेन गोहपुर्-नुमालिगढ्-नगरयोः मध्ये चतुर-मार्गीय-अभिगम-नियन्त्रित-ग्रीन्फील्ड्-मार्गम् अपि अनुमोदितम् अस्ति, यस्मिन् ब्रह्मपुत्रस्य अधः भारतस्य प्रथमः जलान्तर्गामी-मार्गः तथा रेल-सुरङ्गमार्गः अपि अन्तर्भवति। सः अवदत् यत्, एताः परिवर्तनात्मक-परियोजना: सम्पर्करूपेण वर्धयिष्यति, रसद-व्ययं न्यूनीकरिष्यति तथा च सम्पूर्णे असम-राज्ये तथा सम्पूर्णे पूर्वोत्तरे च विकासस्य गतिं वर्धयिष्यति। नोएडा द्वि चत्वारिंशदधिकैकशत- विभागात् बोटेनिकल्-गार्डन् (नोएडा) पर्यन्तं मार्गस्य विस्ताराय अपि मन्त्रिपरिषदः अनुमतिं दत्तवान् इति श्रीमोदी अवदत्। सः अवदत् यत् अयं निर्णयः नोएडा-नगरस्य विकासयात्रायाः गतिं वर्धयिष्यति।

---

**शिवराज-काङ्ग्रेस्-:**

केन्द्रीयमन्त्रिणा शिवराज सिंह चौहानेन काङ्ग्रेस्-दलं राष्ट्रस्य हितम् उपेक्षते इति आरोपितवान्। सामाजिकान्तर्जालीय-पटले, श्रीचौहानः अवदत् यत् अधुना देशः महत्त्वपूर्ण-आर्थिक-अवसरानाम्विभिन्नेषु चरणेषु गच्छन् अस्ति, परन्तु दुर्भाग्यम् अस्ति यत् काङ्ग्रेस्-दलं राहुलगान्धी च असत्यस्य भ्रमस्य च प्रसारणे निमग्नौ स्तः।

---

**विदेश-मन्त्री-म्यूनिख**

विदेश-मन्त्री डा. एस्. जयशङ्करः ह्यः म्यूनिख-सुरक्षा-सम्मेलनावधौ जर्मन-विदेशमन्त्रिणा जोहान वाडेफुल इत्यनेन सह द्वैपाक्षिकं मेलनं कृतवान्। सामाजिकान्तर्जालीये सन्देशे डा. जयशङ्करः अवदत् यत् मेलनावधौ उभौ पक्षौ विविधक्षेत्रेषु सहकारस्य प्रगतिं समीक्षितवन्तौ, क्षेत्रीय-हाट्स्पाट्-विषये च चर्चितवन्तौ। विदेश-मन्त्रिणा कनाडादेशस्य विदेशमन्त्रिणा अनीता आनन्देन सह अपि मिलित्वा अवदत् यत् भारत-कनाडादेशयोः सम्बन्धः निरन्तरं प्रगतिं कुर्वन् अस्ति।

---

**वित्त-मन्त्री-म्यूनिख**

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः ह्यः जर्मनी-देशस्य म्यूनिख-नगरे बवेरिया-देशस्य यूरोपीय-अन्ताराष्ट्रिय-कार्य-मन्त्रिणा श्री ऐरिक बेइसवेङ्गर इत्यनेन सह मिलितवती। सामाजिक-अन्तर्जलीय-सन्देशे, श्रीमती सीतारामनः अकथयत् यत्, अस्मिन् वर्षे जनवरीमासे जर्मन-चान्सलर-वर्यस्य सद्यः एव भारत-भ्रमणावधौ, द्वयोः राष्ट्रयोः सुदृढ-द्वैपाक्षिक-सहभागित्वस्य विषये उभौ चर्चितवन्तौ।

---

## महाशिवरात्रि-पर्व:

महाशिवरात्रि-पर्व अद्य सम्पूर्णे देशे हर्षोल्लासेन, आध्यात्मिक-उत्साहेन च आचर्यते। भगवतः शिवस्य भक्तानां कृते पवित्रतमेषु अवसरेषु अन्यतमः अयं दिवसः व्रतेन, विशेष-प्रार्थनया, च सह मन्दिरेषु रात्रि पूजया सह चिह्नितः भवति। सहस्रशः भक्ताः तीर्थस्थानेषु पवित्रं निमज्जनं कृत्वा शान्तेः समृद्धेः च आशीर्वादं प्रार्थयन्ति।

----------------------------------------

## क्रिकेट

आई. सी. सी. पुरुषाणां विंशतिं प्रति विंशति क्रिकेट्-विश्वचषक-स्पर्धायां, अद्य अपराह्णे आर्. प्रेमदास-क्रीडाङ्गणे चिरप्रतिद्वन्द्वी पाकिस्तान-दलेन सह भारतं स्पर्धिष्यति। भारतीयसमयानुसारं सायं सप्तवादने क्रीडा आरभ्यते।

।। इति वार्ता:।।